National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 243-246
© 2025 NJHSR
www.sanskritarticle.com

**मोहन लाल वर्मा**
सहायकाचार्यः(अ.)
के.सं.वि.वि., एकलव्यपरिसरः,
अगरतला।

**Correspondence:**
**मोहन लाल वर्मा**
सहायकाचार्यः(अ.)
के.सं.वि.वि., एकलव्यपरिसरः,
अगरतला।

# श्रीरामचरितमहाकाव्ये उपाख्ये 'अरविन्दरामायणे' अङ्गीरसस्वरूपवर्णनम्

**मोहन लाल वर्मा**

कस्मिंश्चिदपि काव्ये मधुरतासरसताचारुतायाश्च विकासाय रसस्य समावेश अनिवार्य वर्तते। काव्यप्रयुक्ताः सन्तुलितरसा एव काव्ये मनोहरतामावहन्ति -

**'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति'।**[1]

इत्युक्ते रसं प्राप्य आत्मा आनन्दस्वरूपः भवति। काव्यलक्षणकारैः आचार्यैः आनन्द एव रसः इति परिभाषितमस्ति। रसः नाम तद्वस्तु यस्य आस्वादनं क्रियते - 'रस्यते आस्वाद्यते इति रसः'। एतेनैव लक्षणानुसारेण शृङ्गारादयः रसा उच्यन्ते। एतद्वक्तुं शक्यते यत् केनचित् सहृदयव्यक्तिद्वारा कस्माच्चित् काव्यपाठात् श्रवणाद्वा यद्विलक्षणानन्दस्य प्राप्तिर्भवति स एव आनन्दः रसः कथ्यते। अतः काव्ये रसस्य सन्निवेशः अनिवार्यः वर्तते। रससिद्धान्तस्य प्रवर्तकाचार्येण भरतमुनिना एवं मन्यते यत् काव्ये रसं विना न कस्यचिदर्थस्य प्रवर्तनं शक्यते -

**'नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते'।**[2]

रसशब्दस्य व्युत्पत्तिः द्विधा कृता वर्तते, प्रथमा-**'रस्यते इति रसः** 'द्वितीया- **'सरति इति रसः'** इत्युक्ते यत्प्रवहति सः रसः। इत्युक्ते एतद् वक्तुं शक्यते यद् रसे धर्मद्वयं विद्यमानं वर्तते प्रथमम् आस्वादः द्वितीयं द्रवत्वञ्च। ऋग्वेदे एकस्मिन् स्थाने रसशब्दस्य प्रयोगः सोमरसनिमित्तम् 'आस्वादनम्' इत्यर्थे कृतमस्ति- **'दधानः कलशे रसम्'**[3] अपि च रसशब्दस्य प्रयोगः ब्राह्मणग्रन्थेषु 'मधु' इत्यर्थे कृतः वर्तते। तद्यथा- **'रसो वै मधु'**। कालक्रमे रस उपनिषत्सु आस्वादने प्रवाहत्त्वे चेति स्वभावद्वये वर्णितोऽस्ति अपि च रसादेव ऋग्यजुस्सामादीनाम् ऋचां व्युत्पत्तिः कथिता अस्ति। रसशब्दोऽयं आदर्शनग्रन्थेभ्यः रामायण-महाभारतादिपर्यन्तम् अनेकप्रकारकं वर्णितम् अस्ति किञ्च रसशब्दस्य सभ्या काव्यानुरूपा च प्रथमा व्याख्या आचार्येण भरतमुनिना एव कृता वर्तते।

श्रुतिभिः यद्रसतत्त्वम् अनन्तमखण्डं स्वयं प्रकाशं तथा च सच्चिदानन्दघनस्वरूपं परब्रह्मरूपेण संज्ञितम् अस्ति तदेव रसतत्त्वं काव्यशास्त्रीयैः आचार्यैः अपि तेनैव ऋद्धेन महत्या श्रद्धया च सत्वगुणयुक्तं, स्वयं प्रकाशं चिन्मयम् आनन्दस्वरूपं ब्रह्मास्वाद-सहोदरश्च इत्यादिभिः वैशिष्ट्यैः काव्यात्मके रूपे प्रतिष्ठितं कृतमस्ति। प्रत्यक्षरूपेण रसस्य आस्वादनं मधुराम्लकटुतिक्तादीनां षड्रसाणां माध्यमेन क्रियते अपि च अप्रत्यक्षरूपेण काव्य-विषयरसस्य अनुभवः रीत्यनुभावसञ्चारिभावादीनां कारणस्वरूपेणापि क्रियते।

आचार्यभरतमुनेः काले रसः नाटकीयतत्त्वरूपेणैव विद्यमानम् आसीत्। काव्ये तस्य किमपि स्थानं न आसीत् परन्तु सः रसः कालान्तरे काव्येष्वपि स्थानं प्राप्नोत् अपि च काव्यान्तर्गते नाटकस्यापि गणना प्रारब्धा अभवत्। कश्चित् सहृदयी जनः कथं रसानुभूतिं करोति? इत्येतस्य उत्तरम् आचार्यभरतमुनिः स्वीयग्रन्थस्य नाट्यशास्त्रस्य एकस्मिन् सूत्रे प्रतिपादयति -

**"विभावानुभावव्यभिचारिसंयोगाद्रसनिषपत्तिः"।**[5]

जनानां मनसि नैकाः भावनाः विद्यमानाः भवन्ति याः विशेषपरिस्थितिवशात् स्वकीयां सुषुप्तावस्थां त्यक्त्वा जागरिताः भवन्ति। व्यक्तेः चेष्टाः एताः भावनाः प्रकटयन्ति तथा च भावनैताः कैश्चित्

सहायकतत्त्वैः परिपुष्टिताः भवन्ति । इत्थं सहृदयव्यक्तेः हृदि स्थिता भावना एव क्रमशः जागरिताः प्रकटिताः परिपुष्टाश्च भूत्वा रसरूपेण परिणिताः भवन्ति ।

यद्यपि नाट्यमेव रसः वर्तते किञ्च नाट्यमपि एकं दृश्यकाव्यं वर्तते।[6] श्रव्यकाव्यस्य प्रयोजनमपि **'सद्यःपरनिर्वृत्तये'**[7] अपि च **'करोति कीर्तिं प्रीतिं च'**[8] इत्येतयोः वाक्ययोः 'निवृत्तिः' 'प्रीतिः'इत्येताभ्यां शब्दाभ्यां रसास्वादभूतः परमानन्द एव विवक्षितोऽस्ति। काव्यस्य महत्त्वप्रदर्शने प्रयुक्तं **'स्वादुकाव्यरसोन्मिश्रयः'** अपि च महाकाव्यस्य स्वरूपवर्णने प्रयुक्तं **'रसैश्च सकलैः पृथक्'**[9] इत्येतद् उक्तिद्वयं काव्ये रसस्य अनिवार्यतां प्रधानतां च प्रमाणीकरोति ।

आचार्यविश्वनाथोऽपि काव्यं परिभाषितं कुर्वन् काव्ये रसस्य स्थानमाह -

**'वाक्यं रसात्मकं काव्यम्'**[10]

आचार्यमम्मटः रसस्वरूपं स्पष्टीकुर्वन् लिखति यल्लोके रत्यादि-स्थायिभावानाम् उदयस्य विकासस्य तिरोभावस्य च मुख्यकारणानि कार्यसहकारीणि च भवन्ति। एतान्येव लौकिककारणानि साहित्ये क्रमशः भावविभावानुभावसञ्चारिभावनाम्ना ज्ञायन्ते। एतेषां विभावादीनां सहयोगेन व्यक्तः स्थायिभावः रस इष्यते -

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**[11]
**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥**[12]

भारतीयकाव्यशास्त्रेषु रसाणां संख्या अष्ट(8) तः एकादशं(11) यावत् कथिता अस्ति। एते क्रमशः शृङ्गारहास्यकरूणरौद्रवीर-भयानकवीभत्साद्भुतशान्तवात्सल्यभक्तिरसनाम्ना ज्ञायन्ते ।

एतेषु रसेषु केचन प्रधानाः केचन गौडाश्च रसाः स्वीकृताः सन्ति काव्यशास्त्रीयाचार्यैः। केचन आचार्यास्तु काव्यमूलं कञ्चिदेकमेव रसं स्वीकुर्वन्ति। तद्यथा भोजराजः शृङ्गारं, भवभूतिः उत्तररामचरिते करूणम् अपि च महाकविकालिदासः अभिज्ञानशाकुन्तले करूणञ्च मूलरूपेण प्रतिपादितवान्। सर्वप्रथमं आचार्यभरतमुनिना रसानां प्रधानताया अप्रधानतायाश्च विषये स्वविचारान् अभिव्यानक्। तेषां मतानुसारेण शृङ्गारवीररौद्र-विभत्साश्चेत्येते प्रधानरसाः, हास्यक-रूणाद्भुतभयानकाश्चेत्येते अप्रधानरसाः सन्ति। एते अप्रधानरसाः गौडरसाः अपि कथ्यन्ते ।

**प्रस्तुतेऽस्मिन् महाकाव्ये 'अरविन्दरामायणे' अङ्गीरसस्य वीररसस्य समन्वयः -**

**1 - वीररसस्वरूपम् -**

अस्य रसस्य स्थायिभाव 'उत्साहः' आलम्बनविभावः विजेतव्य-शत्र्वादयः, तेषाञ्च चेष्टाः उद्दीपनविभावाः रोमाञ्चयुद्धसामग्री अन्यसहायकादीनामन्वेषणञ्च अनुभावः भवति। धृतिमतिस्मृति-तर्कादयो व्यभिचारिभावाः भवन्ति। तेभ्यः सर्वेभ्यः समुत्पन्नः उत्साहरूपस्थायिभावः वीररसतां दशां प्राप्नोति ।

साहित्यदर्पणकारः आचार्यविश्वनाथः रसस्वरूपविषये साहित्यदर्पणे एवं लिखति -

**उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।**
**महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः।।**[13]
**आलम्बनविभावास्तु विजेतव्यादयो मताः।**
**विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः**
**अनुभावास्तु तत्र स्युः सहायान्वेषणादयः॥**[14]
**सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः।**
**स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्।।**[15]

वीररसः अन्यरसाणामपेक्षया उत्तमकोटिको भवति । अयम् उत्साहनामकेन स्थायिभावेन युक्तो भवति। एतस्य अधिष्ठातृदेवता इन्द्रः वर्तते । अस्य वर्णश्च स्वर्णिमवर्णः अस्ति। विजेतव्यशत्र्वादयः अस्य आलम्बनविभावरूपेण तिष्ठन्ति। शत्र्वादीनां चेष्टाः उद्दीपनविभावाः भवन्ति। तस्मिन् सहायकसाधनानाम् उत सहायकानामान्वेषणादि-अनुभावाः वर्तन्ते। धैर्यमतिगर्वस्मृतितर्क-हर्षादयः एतस्य व्यभिचारिणः सञ्चारिणः वा भावाः सन्ति। वीररसोऽयं चतुर्भेदात्मको भवति - 1- दानवीरः 2- धर्मवीरः 3- युद्धवीरः 4- दयावीरश्च ।

प्रस्तुतेऽस्मिन् श्रीरामचरितमहाकाव्ये उपाख्ये 'अरविन्दरामायणे' वीररसस्य समावेशः अङ्गीरसरूपेण कृतमस्ति। एतस्मिन्महाकाव्ये श्रीरामलक्ष्मणयोः ताडकया सह मारीचखरदूषणाभ्यां रावणादि-भिस्सह च युद्धस्य वर्णनं प्राप्यते। युद्धप्रसङ्गेषु रामलक्ष्मणरावणा-दीनां युद्धं प्रति उत्साह एव स्थायिभावः वर्तते। रामलक्ष्मणौ रावणादिविपक्षिणः तेषाञ्च सेना आलम्बनविभावाः सन्ति । तेषां शौर्ययुक्त उद्गारः ओजस्विभाषणम् आक्रमणादिदुश्चेष्टाः उद्दीपनविभा सन्ति। तेषाम् आलापनादि-अनुभावाः सन्ति अपि च चिन्तामोहवितर्क इत्यादि व्यभिचारिभावाः सन्ति । एतैः परिपुष्टस्सन् उत्साहनामकः स्थायिभावः वीररसरूपेण अभिव्यक्तो भवति ।

प्रस्तुतेऽस्मिन् महाकाव्ये वीररसयुक्ताः निम्नलिखितप्रसङ्गा उदाहरणानि वा द्रष्टव्यानि सन्ति -

**याता हन्त निशा पुनः सुदिवसश्चोपस्थितो राघवः**
**श्रीमन्तं निजबन्धुमाह जहि भोस्तं मेघनादं ध्रुवम्।**
**गर्जन् दैत्यबलं निहत्य स रणे बाणैर्महादानवं**
**वीरो वीरनिपातकस्तु हतवान् नूनं बलिष्ठं द्विषम्।।**[16]

अत्र मेघनादादिहनने लक्ष्मणस्योत्साहः स्थायिभावः मेघनादादयः शत्रवः आलम्बनविभावाः रामस्य वचनानि लक्ष्मणस्य गर्जनादिकञ्च उद्दीपनविभावाः, लक्ष्मणद्वारा मेघनादादिहननमित्यादय अनुभावाश्च सन्ति । इत्येतैः विभावानुभावादिभिः अनुप्रेरितो भूत्वा उत्साहनामकः स्थायिभावः वीररसरूपेणाभिव्यक्तो भवति ।

**वीररसस्य चत्वारो भेदाः** – वीररसो दानवीरधर्मवीरयुद्धवीर-दयावीररूपेण चतुर्विधात्मकं भवति।
महाकाव्येऽस्मिन् वीररसस्य एतेषां चतुर्णां भेदानाम् उदाहरणानि निम्नलिखितानि सन्ति -

**1.1. दानवीरः** - अतिप्रसन्नः राजा दशरथः रामादीनां चतुर्णां स्वीयपुत्राणां विवाहानन्तरं जनेभ्यो बहुविधदानं करोति। तद्यथा -

**विप्रजनाय ददौ प्रचुरं विभवं विततां वसुधामवधेशः**
**गोशतकोटिमसौ बहुरत्नमयं भवनं नृपतिर्जितदेशः।।**
**पूजितवान् विबुधानमभितः गुरुणा सुमतः कृतवान् भुवि दानं**
**ग्राम्यजनान् परितोष्य महीपतिरेव तुतोष स्वयं नृपमानम्।।**[17]

अस्मिन् प्रसङ्गेऽपि राज्ञः दशरथस्य दानकर्मणि उत्साहनामकः स्थायिभावः परिलक्षितो भवति। सम्प्रदानभूताः विप्रजनाः विभावाः सन्ति। धनभूमिगवादीनां दानम् अनुभावः, मानतुष्ट्यादयः सञ्चारिभावाश्च सन्ति। इत्येतै विभावानुभावादिभिः परिपुष्टो भूत्वा उत्साहनामकः स्थायिभावः दानवीररसरूपेण परिणमति।

**1.2.धर्मवीरः** - एतस्मिन् महाकाव्ये धर्मवीररसस्य बहूनि उदाहरणानि द्रष्टुं शक्यन्ते। यतोहि सम्पूर्णं रामायणं यत्किमपि वा रामायणं भवतु तत् तुलसीदासस्य "रघुकुल रीति सदा चली आए, प्राण जाए पर वचन न जाए" इति सूक्तिना अनुप्राणितं वर्तते। रामायणस्य यत्किमपि वा पात्रं भवतु सः स्वीयधर्मकर्तव्ययोः पालने कुत्रापि न च्युतो भवति। अस्मिन्नपि अरविन्दरामायणाख्ये महाकाव्ये रामो भवतु राजादशरथभरतकैकेयीलक्ष्मणरावणादयो भवन्तु वा सर्वाण्यपि पात्राणि स्वकर्तव्यपालने धर्मपालने च कदापि च्युतानि न भवन्ति। अतोऽस्मिन् महाकाव्ये धर्मवीरस्य बहूनि उदाहरणानि प्राप्यन्ते। तेभ्य एकमुदाहरणम् इत्थमस्ति -
भगवान् रामः मातरं कैकेयीं प्रति एवं कथयति -

**दत्त्वा वचो विरमतीव न कुलं मदीयं**
**जानासि मातरखिलं सुकृतं कुलस्य।**
**तस्माद्विचिन्त्य वचनं परिपालनीयं**
**काले त्वया सुविधिना सुतरां जनन्या।।**[18]

अत्र कुलव्रतपालने उत्साहनामकः स्थायिभावो वर्तते। स्वयं माता कैकेयी विभावः, तया प्रदत्तवचनस्य समयानुसारेण परिपालनम्, तस्याः मनोद्योगाः सञ्चारिभावाश्च सन्ति। इत्येतैर्विभावानुभावा-दिभिः सञ्चारिभावैश्च परिपुष्टो भूत्वा उत्साहनामकस्थायिभावः धर्मवीर-नामकं रसम् अभिव्यनक्ति।

**1.3. युद्धवीरः** - अस्मिन् महाकाव्ये युद्धवीरस्यापि उदाहरणानि यथास्थाने दरीदृश्यन्ते। रामताडकयोर्युद्धस्य प्रसङ्ग उदाहरणरूपेण उपस्थाप्यते -

**समवलोक्य गता नवमूर्च्छनां**
**तदनु चेतनतां समवाप्य सा।**
**गिरिशिलां द्रुमखण्डमपातयत्**
**रघुवरं विनिहन्तुमहो रुषा।।**[19]
**रघुवरो ह्यनलो दनुजा च सा**
**तुषजराशिसमा किल ताडका।**
**अविरतं शरवृष्टिभयात् हता**
**न निहता रघुवीरशरैर्ध्रुवम्।।**[20]

उदाहरणेऽस्मिन् ताडकावधसम्बन्धी रामस्य उत्साहः स्थायिभावः, ताडका विभावः। ताडकाद्वारा शीलाखण्डानां वृक्षशाखानाञ्च रामस्योपरि पातः, रामेण शरवर्षणादयश्च अनुभावाः, मूर्छाभयादयः मानसिकभावाः व्यभिचारिभावाश्च सन्ति। इत्येतेषां विभावानुभाव-व्यभिरिभावानां संयोगमेत्य सम्वर्धित उत्साहनामकः स्थायिभावः युद्धवीररसरूपेण परिपुष्टो भवति।

**1.4. दयावीरः** - अस्मिन् महाकाव्ये युद्धवीरस्य उदाहरणेन सह दयावीरस्यापि उदाहरणानि द्रष्टुं शक्यन्ते। ऋषिविश्वामित्रस्य यज्ञरक्षणसमये यदा रामलक्ष्मणौ राक्षसान् हतः तदा राक्षसाः रामं प्राणदानाय याचनां कुर्वन्ति अपि च भगवान् रामः तेषु दयां कुर्वन् तेषां जीवनदानाय लक्ष्मणं प्रति एवं वदति -

**त्यज हरे त्यज जीवनदायक**
**न यजनेषु कदापि वयं क्वचित्।**
**मुहुरहो न च विघ्ननिपातकाः**
**भवितुमेव शपाम इहागताः।।**[21]
**त्यजतु लक्ष्मण राक्षसपुत्रकान्**
**प्ररुदतो यजनेषु समागतान्।**
**शरणदायिकुलस्य वचस्स्मरन्**
**दशरथस्य पितुर्भुवि चाज्ञया।।**[22]

प्रसङ्गेऽस्मिन् राक्षसाणां प्रति दयासम्बन्धी उत्साहनामकः स्थायिभावः राक्षसाः विभावाश्च सन्ति। राक्षसैः प्राणरक्षाहेतु निवेदनं रोदनादिकञ्च अनुभावाः, तेषां मनसि उत्पन्ना अन्यान्यभावाः 'व्यभिचारिभावाश्च सन्ति। इत्त्थं प्रकारेण विभावानुभावसञ्चारिभिः परिपुष्टः उत्साहनामकः स्थायिभावः दयावीरं सम्वर्धयति।

**सहायकग्रन्थसूची**


1.आधुनिक काव्यशास्त्र -डॉ० आनन्द कुमार श्रीवास्तव, ईस्टर्न बुक लिंकर्स, नई दिल्ली-2012.

2.काव्यप्रकाशः- वामनाचार्यः, झलकीकरटीका, प्रकाशन पुना-1982.

3.काव्यप्रकाशः - आचार्य विश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी – 2010.

4.काव्यालङ्कारः - भाष्य – साहित्यवारिधि डा. रामानन्द शर्मा, चौखम्बा संस्कृत सीरीज, वाराणसी - 2013.

5.काव्यादर्शः -आचार्य श्रीरामचन्द्र मिश्र, चौखम्बा विद्याभवन, वाराणसी - 2005।

6.काव्यदीपिका - व्याख्या- डा. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2011.

7.छान्दोग्योपनिषद् - गीताप्रेस, गोरखपुर।

8.तैत्तिरीयोपनिषद् - गीताप्रेस, गोरखपुर।

9.नाट्यशास्त्रम् - आचार्यभरतमुनिः ।

10.रामचरित मानस - गोस्वामी तुलसीदास, गीताप्रेस, गोरखपुर, विक्रमी-2057.

11.श्रीरामचरितम्' उपाख्यम् 'अरविन्दरामायणम्'- डा. अरविन्दतिवारी, सत्यम् पब्लिशिंग हाउस, मोहन गार्डन, उत्तम नगर, नई दिल्ली.- 2019.

12.साहित्यदर्पणः - आचार्य लोकमणिदहाल, डा. त्रिलोकीनाथ द्विवेदी, आचार्य शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी- 2013.

13.संस्कृत साहित्य का अभिनव इतिहस - डॉ० राधावल्लभ त्रिपाठी, वि०वि० प्रकाशन वाराणसी, 2013.

**सन्दर्भग्रन्थाः**

[1]तैत्तिरीयोपनिषद् / द्वितीया वल्ली / सप्तम अनुवाकः।

[2]आचार्यभरतमुनिः, नाट्यशास्त्रम्- षष्ठ अध्यायः ।

[3]ऋग्वेदः – 9/63/13 ।

[4]छान्दोग्योपनिषद् – 4/17

[5]चार्यभरतमुनिः, नाट्यशास्त्रम्- षष्ठ अध्यायः ।

[6]आचार्यविश्वनाथः, साहित्यदर्पणः -6/1

[7]आचार्यमम्मटः, काव्यप्रकाशः - 1/2

[8]काव्यालङ्कारः -1/2

[9]काव्यालङ्कारः - 1/21 ।

[10]आचार्यविश्वनाथः - साहित्यदर्पणः ।

[11]आचार्यमम्मटः, काव्यप्रकाशः - 4/27

[12]तत्रैव - 4/28

[13]आचार्यविश्वनाथः, साहित्यदर्पणः - 3/232 ।

[14]तत्रैव - 3/233 ।

[15]तत्रैव - 3/234 ।

[16]'श्रीरामचरितम्' उपाख्यम् 'अरविन्दरामायणम्'- 22/40 ।

[17]'श्रीरामचरितम्' उपाख्यम् 'अरविन्दरामायणम् - 11/30 ।

[18]'श्रीरामचरितम्' उपाख्यम् 'अरविन्दरामायणम्' - 2/3 ।

[19]तत्रैव - 5/13 ।

[20]तत्रैव - 5/15 ।

[21]'श्रीरामचरितम्' उपाख्यम् 'अरविन्दरामायणम्'- 5/46 ।

[22]तत्रैव - 5/47 ।